श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ अष्टसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टसप्ततितमः सर्गः ॥

## अगस्त्यं प्रति स्वकीयकुत्सिताहारप्राप्तिकारणं वर्णयता श्वेतेन ब्रह्मणा सह सञ्जाताया वार्ताया उपस्थापनमगस्त्याय दिव्याभूषणस्य दानेन तस्य क्षुत्तृषाकष्टतो मुक्तिश्च

श्रुत्वा तु भाषितं वाक्यं मम राम शुभाक्षरम्।
प्राञ्जलिः प्रत्युवाचेदं स स्वर्गी रघुनन्दन॥ **7.78.1** ॥

शृणु ब्रह्मन् पुरा वृत्तं ममैतत् सुखदुःखयोः।
अनतिक्रमणीयं च यथा पृच्छसि मां द्विज॥ **7.78.2** ॥

पुरा वैदर्भको राजा पिता मम महायशाः।
सुदेव इति विख्यातस्त्रिषु लोकेषु वीर्यवान्॥ **7.78.3** ॥

तस्य पुत्रद्वयं ब्रह्मन् द्वाभ्यां स्त्रीभ्यामजायत।
अहं श्वेत इति ख्यातो यवीयान् सुरथोऽभवत्॥ **7.78.4** ॥

ततः पितरि स्वर्याते पौरा मामभ्यषेचयन्।
तत्राहं कृतवान् राज्यं धर्म्यं च सुसमाहितः॥ **7.78.5** ॥

एवं वर्षसहस्राणि समतीतानि सुव्रत।
राज्यं कारयतो ब्रह्मन् प्रजा धर्मेण रक्षतः॥ **7.78.6** ॥

सोऽहं निमित्ते कस्मिंश्चिद् विज्ञातायुर्द्विजोत्तम।
कालधर्मं हृदि न्यस्य ततो वनमुपागमम्॥ **7.78.7** ॥

सोऽहं वनमिदं दुर्गं मृगपक्षिविवर्जितम्।
तपश्चर्तुं प्रविष्टोऽस्मि समीपे सरसः शुभे॥ **7.78.8** ॥

भ्रातरं सुरथं राज्ये अभिषिच्य महीपतिम्।
इदं सरः समासाद्य तपस्तप्तं मया चिरम्॥ **7.78.9** ॥

सोऽहं वर्षसहस्राणि तपस्त्रीणि महावने।
तप्त्वा सुदुष्करं प्राप्तो ब्रह्मलोकमनुत्तमम्॥ **7.78.10** ॥

तस्येमे स्वर्गभूतस्य क्षुत्पिपासे द्विजोत्तम।
बाधेते परमोदार ततोऽहं व्यथितेन्द्रियः॥ **7.78.11** ॥

गत्वा त्रिभुवनश्रेष्ठं पितामहमुवाच ह।
भगवन् ब्रह्मलोकोऽयं क्षुत्पिपासाविवर्जितः॥ **7.78.12** ॥

कस्यायं कर्मणः पाकः क्षुत्पिपासानुगो ह्यहम्।
आहारः कश्च मे देव तन्मे ब्रूहि पितामह॥ **7.78.13** ॥

पितामहस्तु मामाह तवाहारः सुदेवज।
स्वादूनि स्वानि मांसानि तानि भक्षय नित्यशः॥ **7.78.14** ॥

स्वशरीरं त्वया पुष्टं कुर्वता तप उत्तमम्।
अनुप्तं रोहते श्वेत न कदाचिन्महामते॥ **7.78.15** ॥

दत्तं न तेऽस्ति सूक्ष्मोऽपि तप एव निषेवसे।
तेन स्वर्गगतो वत्स बाध्यसे क्षुत्पिपासया॥ **7.78.16** ॥

स त्वं सुपुष्टमाहारैः स्वशरीरमनुत्तमम्।
भक्षयित्वामृतरसं तेन वृत्तिर्भविष्यति॥ **7.78.17** ॥

यदा तु तद्वनं श्वेत अगस्त्यः स महानृषिः।
आगमिष्यति दुर्धर्षस्तदा कृच्छ्राद् विमोक्ष्यसे ॥ **7.78.18** ॥

स हि तारयितुं सौम्य शक्तः सुरगणानपि।
किं पुनस्त्वां महाबाहो क्षुत्पिपासावशं गतम् ॥ **7.78.19** ॥

सोऽहं भगवतः श्रुत्वा देवदेवस्य निश्चयम्।
आहारं गर्हितं कुर्मि स्वशरीरं द्विजोत्तम ॥ **7.78.20** ॥

बहून् वर्षगणान् ब्रह्मन् भुज्यमानमिदं मया।
क्षयं नाभ्येति ब्रह्मर्षे तृप्तिश्चापि ममोत्तमा ॥ **7.78.21** ॥

तस्य मे कृच्छ्रभूतस्य कृच्छ्रादस्माद् विमोक्षय।
अन्येषां न गतिर्ह्यत्र कुम्भयोनिमृते द्विजम् ॥ **7.78.22** ॥

इदमाभरणं सौम्य तारणार्थं द्विजोत्तम।
प्रतिगृह्णीष्व भद्रं ते प्रसादं कर्तुमर्हसि ॥ **7.78.23** ॥

इदं तावत् सुवर्णं च धनं वस्त्राणि च द्विज।
भक्ष्यं भोज्यं च ब्रह्मर्षे ददात्याभरणानि च ॥ **7.78.24** ॥

सर्वान् कामान् प्रयच्छामि भोगांश्च मुनिपुङ्गव।
तारणे भगवन् मह्यं प्रसादं कर्तुमर्हसि ॥ **7.78.25** ॥

तस्याहं स्वर्गिणो वाक्यं श्रुत्वा दुःखसमन्वितम्।
तारणायोपजग्राह तदाभरणमुत्तमम् ॥ **7.78.26** ॥

मया प्रतिगृहीते तु तस्मिन्नाभरणे शुभे।
मानुषः पूर्वको देहो राजर्षेर्विननाश ह ॥ **7.78.27** ॥

प्रणष्टे तु शरीरेऽसौ राजर्षिः परया मुदा।
तृप्तः प्रमुदितो राजा जगाम त्रिदिवं सुखम् ॥ **7.78.28** ॥

**तेनेदं शक्रतुल्येन दिव्यमाभरणं मम।**
**तस्मिन्निमित्ते काकुत्स्थ दत्तमद्भुतदर्शनम्॥ 7.78.29॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टसप्ततितमः सर्गः॥